पारीन्द्रः ७ श्वेतपिङ्गलः ८ कण्ठीरवः ९ पञ्चशिखः १० शैलाटः ११ भीमविक्रमः १२ सटाङ्कः १३ मृगराट् १४ मृगराजः १५ मरुत्प्लवः १६ केशी १७ लग्नीकाः १८ करिदारकः १९। इति शब्दरत्नावली॥ महावीरः २० श्वेतपिङ्गः २१ गजमोचनः २२ मृगारिः २३। इति जटाधरः॥ इभारिः २४ नखरायुधः २५ महानादः २६ मृगपतिः २७। इति हेमचन्द्रः॥ पञ्चमुखः २८ नखी २९ मानी ३० क्रव्यादः ३१ मृगाधिपः ३२ शूरः ३३ विक्रान्तः ३४ द्विरदान्तकः ३५ बहुबलः ३६ दीप्तः ३७ बली ३८ विक्रमी ३९ दीप्तपिङ्गलः ४०। तन्मांसगुणाः। अर्शःप्रमेहजठरामयजाड्यनाशित्वम्। इति राजनिर्घण्टः॥ अपि च।

"सिंहव्याघ्रहका ऋक्षतरक्षुद्वीपिनस्तथा।
बभ्रुजम्बुकमार्जारा इत्याद्यास्तु गुहाशयाः॥
गुहाशया वातहरा गुरूष्णमधुराश्च ते।
स्निग्धा बल्या हिता नित्यं नेत्रगुह्यविकारिणाम्॥"

इति भावप्रकाशः॥ * ॥

पदान्ते श्रेष्ठार्थवाचकः। इत्यमरः। ३।१।५९॥ (यथा, रामायणे। २। ७३। ७।

'क्व यास्यसि महाराज! हित्वेमं दुःखितं जनम्।
हीनं पुरुषसिंहेन रामेणाक्लिष्टकर्म्मणा॥")

अर्हतां ध्वजः। इति हेमचन्द्रः॥ रक्तशिग्रुः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। ४। ९।

"तुत्थालकटुकाव्योषसिंहार्कहयमारकाः॥")

मेषादिद्वादशराश्यन्तर्गतपञ्चमराशिः। तत्पर्य्यायः। लेयः २। इति सत्कृत्यमुक्तावली॥ तस्याधिष्ठात्री देवता सिंहः। स च मघा-पूर्व्वफल्गुनी-समुदायोत्तरफल्गुनी-प्रथमपादेन भवति। अग्निराशिः। पीतवर्णः। रूक्षः। एवं धूम्रवर्णः। पित्तप्रकृतिः। पूर्व्वदिक्स्वामी। पर्व्वतचारी। क्षत्त्रियवर्णः। क्रूरः। महाशब्दः। अल्पसन्तानः। अल्पस्त्रीसङ्गश्च। तत्र जातफलम्। क्रोधी। शीघ्रगतिः। हास्यवाणिः। भ्रान्तवक्ता। चञ्चलः। शीतलः। मत्स्यप्रियश्च। इति बृहज्जातकादयः॥ * ॥ मेषादिद्वादशलग्नान्तर्गतपञ्चमलग्नम्। तत्र जातफलम्।

"सिंहलग्ने समुद्भूतो भोगी शत्रुविमर्द्दनः।
स्वल्पोदरोऽल्पपुत्त्रश्च सोत्साही शजविक्रमः॥"

इति कोष्ठीप्रदीपः॥

सिंहकेलिः, पुं, (सिंहस्येव केलिर्यस्य।) मञ्जुघोषः। जिनविशेषः। इति त्रिकाण्डशेषः॥

सिंहकेशरः, पुं, (सिंहस्येव केशरो यस्य।) वकुलः। इति त्रिकाण्डशेषः॥ सिंहस्य जटा च॥

सिंहतलः, पुं, (सिंहस्येव तलमत्र। यद्वा, सिंहतलः। पृषोदरादित्वात् साधुः।) कृताञ्जलिः। करद्वययोजनम्। इत्यमरटीकायां रामाश्रमः। २। ६। ८५॥

सिंहतुण्डः, पुं, (सिंहस्य तुण्डमिव पुष्पमस्य।) सेहुण्डवृक्षः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—

"सेहुण्डः सिंहतुण्डः स्यात् वज्री वज्रद्रुमोऽपि च
सुधासमन्तदुग्धा च स्नुक् स्त्रियां स्यात् स्नुही गुडा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ सिंहस्य तुण्डमिव तुण्डमस्य। मत्स्यविशेषः। यथा, मनुः। ५। १६।

"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः॥"

सिंहमुखे, क्ली॥)

सिंहद्वारं, क्ली, (सिंहचिह्नितं द्वारमिति मध्यपदलोपिकर्म्मधारयः।) प्रवेशद्वारम्। तत्पर्य्यायः। प्रवेशनम् २। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। ४३। १७५।

"सिंहद्वारे युवा देवि दृष्टोऽस्माभिर्महाव्रती।
सद्वितीयोऽपि यो धत्ते सौन्दर्य्येणाद्वितीयताम्॥")

सिंहध्वनिः, पुं, (सिंहस्य ध्वनिः।) सिंहशब्दः। सिंहनादसदृशशब्दः। यथा,—

"तुषारसंघातशिलाः खुराग्रैः
समुल्लिखन् दर्पकलः ककुद्मान्।
दृष्टः कथञ्चिद्गवयैर्विविग्नै-
रसोढ़सिंहध्वनिरुन्ननाद॥"

इति कुमारसम्भवम्॥

सिंहनादः, पुं, (सिंहस्येव नादः।) योधानां रणोत्साहजरवः। तत्पर्य्यायः। क्ष्वेड़ा २। इत्यमरः। २। ८। १०७॥ गजयूथदर्शनात् तद्भङ्गाय यथा सिंहस्य नादस्तथा परबलभङ्गाय स्वोत्साहविहद्ये च यो रावः सः। सिंहस्येव नादः सिंहनादः। इति भरतः॥ (यथा आर्य्यासप्तशत्याम्। ७००।

"कविसमरसिंहनादः स्वरानुनादः सुधैकसंवादः।
विद्वद्विनोदकन्दः सन्दर्भोऽयं मया सृष्टः॥"

महादेवः। इति महाभारतम्। १३। १७। ११०॥ * ॥ सिंहस्य नादः।) सिंहशब्दश्च॥

सिंहनादकः, पुं, (सिंह इव नदतीति नद+ण्वुल्।) वृक्कारः। इति हारावली। १९४॥ सिङ्गा इति भाषा॥

सिंहनादिका, स्त्री, सिंहमपि नादयतीति। नद+णिच्+ण्वुल्। टापि अत इत्वम्।) दुरालभा। इति शब्दचन्द्रिका॥

सिंहपर्णी, स्त्री, सिंहस्य शिरोः पर्णमिव पर्णमस्याः। ङीष्।) वासकः। इति जटाधरः॥

सिंहपुच्छिका, स्त्री, (सिंहपुच्छी+स्वार्थे कन्।) चित्रपर्णिका। इति रत्नमाला॥ चुद्रचाकुलिया इति भाषा॥

सिंहपुच्छी, स्त्री, (सिंहस्य पुच्छ इव पुष्पमस्याः। ङीष्।) चित्रपर्णिका। पृश्निपर्णी। इत्यमरः। २। ४। ९३॥ माषपर्णी। इति रत्नमाला॥

सिंहपुष्पी, स्त्री, (सिंहस्य पुच्छ इव पुष्पमस्याः। ङीष्।) पृश्निपर्णी। इति राजनिर्घण्टः॥

सिंहमुखी, स्त्री, (सिंहस्य मुखमिव पुष्पमस्याः। ङीष्।) वासकः। इति राजनिर्घण्टः॥

सिंहयाना, स्त्री, (सिंहो यानं वाहनं यस्याः।) दुर्गा। इति हेमचन्द्रः॥

सिंहरथा, स्त्री, (सिंह एव रथो यस्याः।) दुर्गा। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १७६। १७।

"वराङ्गनां सिंहरथां बहुरूपां हयध्वजाम्॥")

सिंहलं, क्ली, (सिंहलो देशः प्रभवत्वेनास्त्यस्येति। अच्।) रङ्गम्। इति हेमचन्द्रः॥ रीतिः। त्वचम्। इति राजनिर्घण्टः॥

सिंहलः, पुं, स्त्री, (सिंहं लाति प्राप्नोतीति। ला+कः।) देशविशेषः। शिलोन इति ख्यातः। यथा,—

"दक्षिणेऽवन्तिमाहेन्द्रमलया ऋष्यमूककाः।
चित्रकूटमहारण्यकाञ्चीसिंहलकोङ्कणाः॥"

इति ज्योतिस्तत्त्वम्॥

(अयञ्च जम्बुद्वीपस्य अष्टप्रसिद्धद्वीपानामन्यतमः। यथा, भागवते। ५। १९। २९—३०।

"जम्बुद्वीपस्य च राजन् उपद्वीपानष्टौ हैक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान्। तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्त्तनो रमणको मन्दहरिणः पाञ्चजन्यः सिंहलो लङ्केति॥" * ॥

तद्देशवासिनि, पुं भूम्नि। यथा, महाभारते। १। १७६। ३५।

"पौण्ड्रान् किरातान् यवनान् सिंहलान् वर्व्वरान् खशान्।
ससर्ज्ज फेनतः सा गौर्म्लेच्छान् बहुविधानपि॥")

सिंहलस्था, स्त्री, (सिंहले तिष्ठति या। स्था+कः।) सैंहली। इति राजनिर्घण्टः॥ सिंहलदेशवासिनी च॥

सिंहलास्थानः, पुं, (सिंहल आस्थानं यस्य।) तालवृक्षसदृशवृक्षविशेषः। यथा,—

"प्रोत्फलः सिंहलास्थानस्फुड़ी पिच्छा छटापि च॥"

इति शब्दमाला॥

सिंहलीलः, पुं, (सिंहस्य लीलेव लीला यत्र।) रतिबन्धविशेषः। तस्य लक्षणं यथा,—

"लिङ्गोपरिस्थिता नारी भूमौ दत्त्वा पदद्वयम्।
हृदये दत्तहस्ता च सिंहलीलः प्रकीर्त्तितः॥
लिङ्गोपरिस्थिता नारी कान्तोरुस्थपदद्वया।
हृदये दत्तहस्ता च सिंहलीलोऽप्ययमावपि॥"

इति रतिमञ्जरी॥

सिंहवाहिनी, स्त्री, सिंहरूपी वाहो वाहनमस्यस्या इति। इनि।) दुर्गा। यथा,—

"सिंहमारुह्य कल्पान्ते निहतो महिषो यतः।
महिषघ्नी ततो देवी कथ्यते सिंहवाहिनी॥"

इति देवीपुराणे ४५ अध्यायः॥